CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.13

Coll. No. 564

Title Tattva bodhini

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 564. Subject : Grammar.

Title : Tattvabodhini.

Author : — Scribe : —

Date of the work : — Date of the Ms. :

Place of the work : — Place of the Ms. : —

Size : 9.3" by 4.6" Extent : 2 foll.

Language : Sanskrit. Script : Devanāgarī

Remarks : —

नुरेवेति। तथा चामरः। आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी। आहुर्दुहितरं स
र्वे ऽपत्यं तोकं तयोः समे इति। पुत्रत्वमभूतमाह। ततः प्राच्यामिति। पित्रपेक्षया ये प्रां
चः। पितामहप्रपितामहादयस्तेषामपीत्यर्थः। अत्रायमाशयः। अपत्यशब्दः क्रि
यानिमित्तो न त्वात्मजपर्यायः। न पतत्यनेनेत्यपत्यमिति व्युत्पत्तेः। पंक्तिविंशति
इति सूत्रे भाष्यकृता दर्शितत्वात्। बाहुलकात्करणे यत्प्रत्ययः। यन्निमित्तं यस्या
पतनं तत्तस्यापत्यमिति फलितोऽर्थः। तथा च पौत्रादिः पितामहादीनामपतनहे
तुरिति तेषामपत्यं भवति। प्रसिद्धं च व्यवहितानां पितामहादीनामनुवर्तते तिजरत्का
र्वाद्युपाख्यानेषु। अपत्यं पौत्रप्रभृतीति सूत्रमप्यत्रानुगुणम्। आद्यपदे हि अ ३
पत्यमिवापत्यमिति गौणी वृत्तिराश्रयणीया स्यात्। अमरस्तु स्व भाष्यादि
विरोधादुपेक्ष्य इति। तद्धान्ये इति। आद्यपदे प्रत्ययमात्रानिवृत्तये। अन्त्ये तु स्व
घ्नन संख्यायोऽनिष्टः स्यात्ति निवृत्तपेइत्यर्थः। औपगवादिभ्यः स्यादिति। तृतीय
स्य तु पगुं प्रति अनपत्यत्वादिति भावः। एवं चासति सूत्रे अस्मिन्नर्थे औपगवि
रित्यनिष्टमेव स्यात्। औपगव इत्यादिषु तु न क्षति ध्यनातिबोध्यं। अजीवज्ज्ये छइ ति। १

यथाऽनंतरापत्येऽतइञ् न भवति तथा गोत्रापत्ये द्वयेन भवति। २

श्रीगणेशाय नमः॥ एको गोत्रे। औपगव इति। उपगुशब्द एव प्रत्ययं लभते न त्वौपगव
शब्द इति गोत्रापत्येप्यनंतरापत्य इव अण् एव स भवति न त्विञ्। गार्ग्य इति। गोत्रापत्ये गर्गा
दिभ्यो यञिति विशिष्य विधानादनंतरापत्य इवात्र अत इञ् न भवति किंतु यञेव स च गा
र्ग्यस्यापत्येपि भवति न त्वत्र यञंतात्फक्। एको गोत्रे इति नियमात्। नाडायन इति। नडादि
भ्यः फगिति गोत्रापत्ये विधानादत्राप्यत इञ् न भवति किंतु फगेव स च नाडायनस्याप
गं ३ त्येपि भवति न तु फगंतादिञ्। उक्तनियमात्। नन्वेवं कस्मिन्गोत्रे युगपदनेकप्रत्य
याप्रसक्तेर्व्यर्थमिदं सूत्रमित्याशंक्य सूत्रारंभफलं मतभेदेन व्यवस्थापयति। गो
त्रे स्वैकेति। स्वं गोत्रं तदपेक्षया एकोनसंख्यानाम्। तृतीये द्वयोः परंपरा च। तुर्ये
त्रयाणां पंचमे तु चतुर्णामित्यादि परंपरा प्रसज्यत इत्यर्थः। तथा हि उपगोस्तृतीये
अणिञोः परंपरा च तुर्ये त्वणिञ्फकां पंचमे अणिञ्फगिञां। यद्यपि अत्र यस्ये
ति चेति लोपेन अणादेरसत्त्वादणिञादीनां परंपरेत्युक्तिर्न संगच्छते तथाप्यप्रता गं ४
दिभ्युत्पन्ने इञंतात्फगित्युत्पत्तिमात्राभिप्रायेण प्रत्ययपरंपराविधानं बोध्य
म्। स्वद्व्यूनसंख्येभ्य इति। स्वं गोत्रं तदपेक्षया द्व्यूनसंख्येभ्यः प्रातिपदिकेभ्यः। तृ
तीये एकस्मादनिष्टोत्पत्तिश्चतुर्थे द्वाभ्यां पंचमे त्रिभ्य इत्यादीत्यर्थः। अपत्यं पि

जीवज्ज्येष्ठे जीवद्वंश्ये वा युवसंज्ञायां सत्यां गोत्रसंज्ञा नेति भावः। इष्टे सिद्धेपीति॥
अस्मिन्पक्षे औपगवस्यापत्यं तदुपगोरपत्यमिति उपगोर्यदा प्रत्ययस्तदा
औपगव इतीष्टं यद्यपि सिध्यति तथाप्यौपगविरित्यनिष्टं प्राप्नोतीत्यर्थः। तत इ
ति। इञंतादित्यर्थः। ~~[illegible]~~रिति। फगंतादिञ् इञंतात्फक् इति तदंतात्पुनरिञ्
इत्यादि परंपरायां सत्यामित्यर्थः। नियमार्थमिति। नन्वाद्यपक्षे तत्तत्पितृवाच
कादेव प्रत्ययो न तु मूलप्रकृतेः स्यात्। अनंतरापत्ये मुख्यसंबंधे चरितार्थ
स्याणादेर्गौणसंबंधेपि प्रवृत्तेरन्याय्यत्वात्। तथा च औपगवापत्ये न तु उपगो
भावो मुख्यसंबंधात्तत्राप्राप्ते विध्यर्थमेवेदं सूत्रं न तु नियमार्थमिति। औपग
वशब्दादपि प्रत्ययो दुर्वार इति चेत्। अत्राहुः। गोत्रे बोधनीये क्रमे
ण अनेकप्रत्ययप्रसंगे एक एव अपत्यप्रत्ययः स्यादिति सूत्रार्थे लब्धे औ
पगवशब्दस्यापत्यप्रत्ययांतत्वात्पुनरपत्यप्रत्ययस्ततो नोत्पद्यत इत्यग
त्या परंपरासंबंधाभ्युपगमेनोपगोरेव तदुत्पत्तिर्न त्वौपगवशब्दादिति सिद्ध
मिष्टमिति॥ श्रीरस्तु॥

प्रत्ययोत्पत्तिः। २

इति तत्वबोधिनी